पातञ्जलं, क्ली, (पतञ्जलिना स्वनामविश्रुतमहर्षिणा प्रणीतं प्रोक्तं वा इति अण् ।) पतञ्जलिमुनिप्रणीतपादचतुष्टयात्मकयोगकाण्डनिरूपकदर्शनशास्त्रविशेषः ॥ तत्र प्रथमे पादे अथ योगानुशासनमिति योगशास्त्रारम्भे प्रतिज्ञां विधाय योगश्चित्तवृत्तिनिरोध इत्यादिना योगलक्षणमभिधाय समाधिं सप्रपञ्चं निरदिक्षद्भगवान् पतञ्जलिः ॥ १ ॥ द्वितीये तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोग इत्यादिना व्युत्थितचित्तस्य क्रियायोगं यमादीनि पञ्च बहिरङ्गानि साधनानि॥ २॥ तृतीये । देशबन्धश्चित्तस्य धारणेत्यादिना धारणाध्यानसमाधित्रयमन्तरङ्गं संयमपदवाच्यं तत्रावान्तरफलं विभूतिजातम्॥३॥ चतुर्थे जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धय इत्यादिना सिद्धिप्रपञ्चनपुरःसरं परमं प्रयोजनं कैवल्यम् ॥ ४ ॥ प्रधानादीनि पञ्चविंशतितत्त्वानि साङ्ख्योक्तान्येवात्रापि । षड्‌विंशस्तु परमेश्वरोऽधिकः । इति सर्व्वदर्शनसंग्रहः ॥

पातनं, क्ली, (पत + णिच् + भावे ल्युट् ।) अधोनयनम् । यथा "ऊर्द्ध्वाधस्तिर्य्यक्‌पातनादिभी रसस्य नानाविधा शुद्धिरुक्ता ।" इति रत्नावली ॥

पाता, [ऋ] त्रि, (पाति रक्षतीति । पा रक्षणे + तृच् ।) रक्षिता । यथा,—

"संहारकर्त्तुः संहर्त्ता पातुः पाता परात्परः ।
ममाज्ञयायं संहर्त्ता नाम्ना तेन हरः स्मृतः ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६ अध्यायः ॥

गन्धपत्रः । इति शब्दचन्द्रिका ॥ वावुइ इति भाषा ॥

पातालं, क्ली, (पतन्त्यस्मिन् दुष्क्रियावन्त इति । पत + "पतिचण्डिभ्यामालञ् ।" उणां । १ । ११६ । इति आलञ् । पादस्य तले वर्त्तते इति पृषोदरात् साधुरित्येके ।) विवरम् । वडवानलः । इति मेदिनी ॥ लग्नाच्चतुर्थस्थानम् । यथा,—

"पातालं हिवुकञ्चैव सुहृदम्बुचतुर्थकम् ॥"

इति ज्योतिस्तत्त्वम् ॥

स्वनामख्यातभुवनविशेषः । तत्पर्य्यायः । अधोभुवनम् २ बलिसद्म ३ रसातलम् ४ नागलोकः ५ । इत्यमरः ॥ अधः ६ उरगस्थानम् ७ ॥ * ॥ सप्तपातालानि यथा,—

"अतलं नितलञ्चैव वितलञ्च गभस्तिमत् ।
तलं सुतलपाताले पातालानि तु सप्त वै ॥"

इति शब्दरत्नावली ॥

शेष उवाच ।

"कथयामि महाभाग ! पातालस्य विनिर्णयम् ।
क्रमादेव निबोधैतत् सावधानो द्विजर्षभ ! ॥
पातालानि च सप्तैव मुनयः संप्रचक्षते ।
अतलं वितलञ्चैव सुतलञ्च तलातलम् ॥
महातलञ्च विख्यातं ततो ज्ञेयं रसातलम् ।
ततः पातालमित्येवं सप्त पातालसंज्ञकाः ॥
एते स्वर्गाधिकसुखा बिलस्वर्गाः प्रकीर्त्तिताः ।
सम्यद्भवनोद्यानविहाराक्रीड़चत्वराः ॥
या च सा मेदिनी ब्रह्मन् ! धत्ते स्थावरजङ्गमान् ।
अधस्तस्या यदतलं योजनायुततो द्विज ! ॥
मयपुत्त्रो महामायो वसत्यत्र महासुरः ।
येन सृष्टाः पुरा माया षड़्‌न्नवतिः किल ॥१॥
तदधो वितलं नाम योजनानां ततोऽयुते ।
हरो विहरते तत्र भगवान् हाटकेश्वरः ॥
सुपार्श्वदैर्भूतगणैर्भवान्या च सह प्रभुः ।
प्रवृत्ता च सरित् तत्र हाटकी नाम विस्तृता ॥२॥
अधः सुतलमित्येतत् योजनानां ततोऽयुते ।
तत्रोदारश्रवाः पुण्यश्लोको वैरोचनिर्ब्बलिः ॥३॥
तलातलं ततोऽधस्तात् सुतलाद्योजनायुते ।
मयो नाम दानवेन्द्रस्त्रिपुराधिपतिर्म्महान् ।
निवसत्यत्र सुचिरं मायानां परमाश्रयः ॥ ४ ॥
महातले ततोऽधस्ताद्योजनानामथायुते ।
सर्पाणां काद्रवेयाणां गणः क्रोधवशाह्वयः ॥
गरुड़ात् सर्व्वदा भीतः सकुटुम्बः सुहृद्वृतः ।
निवसत्यनभिज्ञातः पक्षिराजेन गह्वरे ॥ ५ ॥
रसातले ततोऽधस्ताद्योजनानामथायुते ।
निवसन्ति दानवाश्च शक्राङ्गीता निरन्तरम् ॥६॥
पाताले तु ततोऽधस्ताद्योजनानां द्विजायुते ।
नागलोकेश्वराः शूरा निवसन्ति महाबलाः ॥" ७

इति पाद्मे पातालखण्डे १ । २ । ३ अध्यायाः ॥ *

अपि च अग्निपुराणे ।

"अतलं सुतलञ्चैव वितलञ्च गभस्तिमत् ।
महातलं रसातलं पातालं सप्तमं स्मृतम् ॥
कृष्णभौमं शिलाभौमं पातालं नीलमृत्तिकम् ।
रक्तपीतश्वेतकृष्णभौमानि च भवन्त्यपि ॥
पातालानाञ्च सप्तानां लोकानाञ्च यदन्तरम् ।
सुषिरं तानि कथ्यन्ते भुवनानि चतुर्द्दश ॥
अष्टाविंशतिविख्यातास्ततो नरककोटयः ।
नरकाणामधस्तात्तु धूमः कालाग्निसम्भवः ॥
तस्याधस्तादनन्ताख्यो रुद्रः सर्व्वमयो महान् ।
तदधो धर्म्मचक्रन्तु येनेदं धार्य्यते जगत् ॥" * ॥

अन्यच्च ।

"दशसाहस्रमेकैकं पातालं मुनिसत्तम ! ।
अतलं वितलञ्चैव नितलञ्च गभस्तिमत् ॥
महाख्यं सुतलञ्चाग्र्यं पातालञ्चापि सप्तमम् ।
कृष्णाशुक्लारुणापीताशर्कराशैलकाञ्चनाः ॥
भूमयो यत्र मैत्रेय ! वरप्रासादशोभिताः ।
तेषु दानवदैतेयजातयः शतसंघशः ॥
निवसन्ति महाभागा अहयश्च महामुने ! ।
स्वर्लोकादपि रम्याणि पातालानीति नारद ! ॥
दिवार्करश्मयो यत्र प्रभां तन्वन्ति नातपम् ।
शशिनश्च न शीताय निशि द्योताय केवलम् ॥
पातालानामधश्चास्ते विष्णोर्या तामसी तनुः ।
शेषाख्या यद्‌गुणान् वक्तुं न शक्ता दैत्यदानवाः ॥
योऽनन्तः पठ्यते सिद्धैर्द्देवदेवर्षिपूजितः ।
यस्यैषा सकला पृथ्वी फणामणिशिखारुणा ।
आस्ते कुसुममालेव कस्तद्वीर्य्यं वदिष्यति ॥
यदा विजृम्भतेऽनन्तो मदाघूर्णितलोचनः ।
तदा चलति भूरेषा साद्रितोयाब्धिकानना ॥"

इति विष्णुपुराणे । २ । ५ । अध्यायः ॥

पातालः, पुं, (पतति जारणाद्यर्थं पारदादिकं यत्र । पत + आलञ् ।) औषधपाकार्थयन्त्रविशेषः । इति शब्दचन्द्रिका ॥ तत्प्रकारो यथा, वैद्यके ।

"ऊर्द्ध्वमापस्तले वह्निर्मध्ये तु रससंग्रहः ।
पातालयन्त्रमेतद्धि शोधयेत् सूतकादिकम् ॥"

पातालगरुड़ी, स्त्री, (पातालाख्या गरुड़ी ।) लताविशेषः । छिउड़ा इति हिन्दीभाषा ॥ तत्पर्य्यायः । वत्सादनी २ सोमवल्ली तिक्ताङ्गा ४ मेचकाभिधा ५ तार्क्षी ६ सौपर्णी ७ गारुड़ी ८ दीर्घकाण्डा ९ दृढ़काण्डा १० महाबला ११ दीर्घवल्ली १२ दृढ़लता १३ । अस्या गुणाः । मधुरत्वम् । पित्तदाहास्रदोषविषदोषनाशित्वम् । वृष्यत्वम् । सन्तर्पणत्वम् । रुच्यत्वञ्च । इति राजनिर्घण्टः ॥

अपि च ।

"छिलिहिण्डो महामूलः पातालगरुड़ाह्वयः ।
छिलिहिण्डः परं वृष्यः कफघ्नः पवनापहः ॥"

इति भावप्रकाशः ॥

पातालनिलयः, पुं, (पाताले पातालं वा निलयो यस्य ।) दैत्यः । इति हलायुधः ॥ सर्पः । इति राजनिर्घण्टः ॥

पातालौकाः, [स्] पुं, (पातालमोकः स्थानमस्येति ।) दैत्यः । इति हेमचन्द्रः ॥ पातालवासिनि, त्रि ॥

पातिः, पुं, (पाति रक्षतीति । पा + "पातेरतिः ।" उणां । ५ । ५ । इति अतिप्रत्ययः ।) प्रभुः । स्वामी । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

पातिकः, पुं, (पातः पतनं जले निमज्जनोन्मज्जनमेवास्यास्तीति । पात + ठन् ।) शिशुमारः । इति शब्दमाला ॥

पातिली, स्त्री, (पातिः सम्पातिः पक्षियूथं लीयतेऽत्र । ली + डः । ङीष् च ।) वागुरा । (पातिः स्वामी लीयतेऽस्याम् ।) नारी । मृत्पात्रभेदः । इति मेदिनी ॥ पातिल् इति भाषा ॥

पातुकः, त्रि, (पत + "लषपतपदस्थेति ।" ३ । २ । १५४ । इति उकञ् ।) पतयालुः । पतनशीलः । इत्यमरः ॥ (यथा, महाभारते । १२ । ९१ । ४२ ।

"यमो राजा धार्म्मिकाणां मान्धातः परमेश्वरः ।
संयच्छन् भवति प्राणानसंयच्छंस्तु पातुकः ॥")

प्रपाते जलहस्तिनि च पुं । इति मेदिनी ॥

पात्त्रः, त्रि, (नानागुणालङ्कृतो जनः ।

"अपात्त्रः पात्त्रतां याति यत्र पात्त्रो न विद्यते ॥"

इत्युणादिवृत्तिधृतउज्ज्वलदत्तः ॥

तथा च महाभारते । १३ । ६९ । २२ ।

"शुभे पात्त्रे ये गुणा गोप्रदाने
तावान् दोषो ब्राह्मणस्वापहारे ॥")

पाधातोस्त्रप्रत्ययनिष्पन्नत्वादेकतकारवानयम् ॥

पात्त्रं, क्ली, पाति रक्षति क्रियामाधेयं वा । पिबन्त्यनेनेति वा । पा रक्षणे पा पाने वा + "सर्व्वधातुभ्यः ष्ट्रन् ।" उणां ४ । १५८ । इति ष्ट्रन् ।)